# उपपुराणानां संख्या निर्धारणम्

**डॉ0 प्रमिता शुक्ला**

कियन्तो विपश्चितो निश्चिन्वति यद् तथा महापुराणानां संख्या अष्टादश नियताः सन्ति तथोपपुराणानां संख्या निश्चिता नास्ति। यतोहि अष्टादशभ्य उपपुराणेभ्येऽपि अतिरिक्तानि पुराणानि समुपलभ्यन्ते। अत उपपुराणानां संख्या अस्ति असंख्याता, किन्तु मतमेतत्रास्ति सुसङगतम् यतो हि महापुराणनामिव उपपुराणानामपि संख्यानियता एव सन्ति, अष्टादश, अतोऽष्टादश, महापुराणवदष्टादशानि उपपुराणानि अपि निभाल्यन्ते पुराणेषु। एवञ्च यथ अष्टादशानि महापुराणनि विद्यन्ते तथैवाष्टादश–संख्याकानि उपपुराणान्यपीति निर्विवादम्।